# सुन्दरकाण्ड षट्त्रिंशः सर्गः(३६) - ॥ अङ्गुलीयकप्रदानम् ॥

भूय एव महातेजा हनुमान् मारुतात्मजः ।
अब्रवीत् प्रश्रितं वाक्यं सीता प्रत्यय कारणात् ॥ १ ॥

वानरोऽहं महाभागे दूतो रामस्य धीमतः ।
राम नामाङ्कितं चेदं पश्य देव्यङ्गुलीयकम् ॥ २ ॥

प्रत्ययार्थं तवानीतं तेन दत्तं महात्मना ।
समाश्वसिहि भद्रं ते क्षीण दुःख फला ह्यसि ॥ ३ ॥

गृहीत्वा प्रेक्षमाणा सा भर्तुः कर विभूषणम् ।
भर्तारमिव सम्प्राप्ता जानकी मुदिताऽभवत् ॥ ४ ॥

चारु तद् वदनं तस्यास् ताम्र शुक्लाय तेक्षणम् ।
अशोभत विशालाक्ष्या राहु मुक्त इवोडुराट् ॥ ५ ॥

ततः सा ह्रीमती बाला भर्तृ सन्देश हर्षिता ।
परितुष्टा प्रियं कृत्वा प्रशशंस महाकपिम् ॥ ६ ॥

विक्रान्तस् त्वं समर्थस्त्वं प्राज्ञस्त्वं वानरोत्तम ।
येनेदं राक्षसपदं त्वयैकेन प्रधर्षितम् ॥ ७ ॥

शत योजन विस्तीर्णः सागरो मकरालयः ।
विक्रम श्लाघनीयेन क्रमता गोष्पदीकृतः ॥ ८ ॥

न हि त्वां प्राकृतं मन्ये वानरं वानरर्षभ ।
यस्य ते नास्ति सन्त्रासो रावणान्नापि सम्भ्रमः ॥ ९ ॥

अर्हसे च कपि श्रेष्ठ मया समभिभाषितुम् ।
यद्यसि प्रेषितस् तेन रामेण विदितात्मना ॥ १० ॥

प्रेषयिष्यति दुर्धर्षो रामो न ह्यपरी क्षितम् ।
पराक्रम मविज्ञाय मत् सकाशं विशेषतः ॥ ११ ॥

दिष्ट्या स कुशली रामो धर्मात्मा सत्य सङ्गरः ।
लक्ष्मणश्च महातेजाः सुमित्रा नन्द वर्धनः ॥ १२ ॥

कुशली यदि काकुत्स्थः किं नु सागर मेखलाम् ।
महीं दहति कोपेन युगान्ताग्नि रिवोत्थितः ॥ १३ ॥

अथवा शक्तिमन्तौ तौ सुराणामपि निग्रहे ।
ममैव तु न दुःखा नामस्ति मन्ये विपर्ययः ॥ १४ ॥

कच्चिन्न व्यथितो रामः कच्चिन्न परितप्यते ।
उत्तराणि च कार्याणि कुरुते पुरुषोत्तमः ॥ १५ ॥

कच्चिन्न दीनः सम्भ्रान्तः कार्येषु च न मुह्यति ।
कच्चित् पुरुष कार्याणि कुरुते नृपतेः सुतः ॥ १६ ॥

द्विविधं त्रिविधोपाय मुपायमपि सेवते ।
विजिगीषुः सुहृत् कच्चिन् मित्रेषु च परन्तपः ॥ १७ ॥

कच्चिन् मित्राणि लभते मित्रैश् चाप्यभि गम्यते ।
कच्चित् कल्याण मित्रश्च मित्रैश् चापि पुरस्कृतः ॥ १८ ॥

कच्चिदाशास्ति देवानां प्रसादं पार्थिवात्मजः ।
कच्चित् पुरुषकारं च दैवं च प्रतिपद्यते ॥ १९ ॥

कच्चिन्न विगत स्नेहः विवासान् मयि राघवः ।
कच्चिन्मां व्यसना दस्मान् मोक्षयिष्यति वानर ॥ २० ॥

सुखाना मुचितो नित्य मसुखाना मनूचितः ।
दुःख मुत्तर मासाद्य कच्चिद्रामो न सीदति ॥ २१ ॥

कौसल्यायास् तथा कच्चित् सुमित्रायास् तथैव च ।
अभीक्ष्णं श्रूयते कच्चित् कुशलं भरतस्य च ॥ २२ ॥

मन्निमित्तेन मानार्हः कच्चिच् छोकेन राघवः ।
कच्चिन् नान्यमना रामः कच्चिन्मां तारयिष्यति ॥ २३ ॥

कच्चि दक्षौहिणीं भीमां भरतो भ्रातृ वत्सलः ।
ध्वजिनीं मन्त्रिभिर् गुप्तां प्रेषयिष्यति मत् कृते ॥ २४ ॥

वानराधिपतिः श्रीमान् सुग्रीवः कच्चिदेष्यति ।
मत्कृते हरिभि र्वीरैर् वृतो दन्त नखायुधैः ॥ २५ ॥

कच्चिच्च लक्ष्मणः शूरः सुमित्रानन्द वर्धनः ।
अस्त्र विच्छर जालेन राक्षसान् विधमिष्यति ॥ २६ ॥

रौद्रेण कच्चिदस्त्रेण ज्वलता निहतं रणे ।
द्रक्ष्याम् यल्पेन कालेन रावणं ससुहृज् जनम् ॥ २७ ॥

कच्चिन्न तद्धेम समान वर्णं
तस्याननं पद्म समान गन्धि ।
मया विना शुष्यति शोक दीनं
जलक्षये पद्म मिवातपेन ॥ २८ ॥

धर्मापदेशात् त्यजतश्च राज्यं
मां चाप्यरण्यं नयतः पदातिम् ।
नासीद् यथा यस्य न भीर्न शोकः
कच्चित् स धैर्यं हृदये करोति ॥ २९ ॥

न चास्य माता न पिता च नान्यः
स्नेहाद् विशिष्टोऽस्ति मया समो वा ।
तावत्त्वहं दूत जिजीविषेयं
यावत् प्रवृत्तिं शृणुयां प्रियस्य ॥ ३० ॥

इतीव देवी वचनं महार्थं
तं वानरेन्द्रं मधुरार्थ मुक्त्वा ।
श्रोतुं पुनस्तस्य वचोऽभिरामं
रामार्थयुक्तं विरराम रामा ॥ ३१ ॥

सीताया वचनं श्रुत्वा मारुतिर् भीम विक्रमः ।
शिरस् यञ्जलि माधाय वाक्य मुत्तर मब्रवीत् ॥ ३२ ॥

न त्वामिहस्थां जानीते रामः कमल लोचने ।
तेन त्वां नानयत्याशु शचीमिव पुरन्दरः ॥ ३३ ॥

श्रुत्वैव तु वचो मह्यं क्षिप्रमेष्यति राघवः ।
चमूं प्रकर्षन् महतीं हर्यृक्ष गण संकुलाम् ॥ ३४ ॥

विष्टम्भयित्वा बाणौघै रक्षोभ्यं वरुणालयम् ।
करिष्यति पुरीं लङ्कां काकुत्स्थः शान्त राक्षसाम् ॥ ३५ ॥

तत्र यद्यन्तरा मृत्युर् यदि देवाः सहासुराः ।
स्थास्यन्ति पथि रामस्य स तानपि वधिष्यति ॥ ३६ ॥

तवादर्शनजे नार्ये शोकेन स परिप्लुतः ।
न शर्म लभते रामः सिंहार्दित इव द्विपः ॥ ३७ ॥

मलयेन च विन्ध्येन मेरुणा मन्दरेण च ।
दर्दुरेण च ते देवि शपे मूलफलेन च ॥ ३८ ॥

यथा सुनयनं वल्गु बिम्बोष्ठं चारु कुण्डलम् ।
मुखं द्रक्ष्यसि रामस्य पूर्णचन्द्र मिवोदितम् ॥ ३९ ॥

क्षिप्रं द्रक्ष्यसि वैदेहि रामं प्रस्रवणे गिरौ ।
शतक्रतु मिवासीनं नाकपृष्ठस्य मूर्धनि ॥ ४० ॥

न मांसं राघवो भुङ्क्ते न चापि मधु सेवते ।
वन्यं सुविहितं नित्यं भक्तमश्नाति पञ्चमम् ॥ ४१ ॥

नैव दंशान्न मशकान्न कीटान्न सरीसृपान् ।
राघवोऽपनयेद् गात्रात्  त्वद्गते नान्तरात्मना ॥ ४२ ॥

नित्यं ध्यानपरो रामो नित्यं शोकपरायणः ।
नान्यच्चिन्तयते किञ्चित्स तु कामवशं गतः ॥ ४३ ॥

अनिद्रः सततं रामः सुप्तोऽपि च नरोत्तमः ।
सीतेति मधुरां वाणीं व्याहरन् प्रति बुध्यते ॥ ४४ ॥

दृष्ट्वा फलं वा पुष्पं वा यद्वान्यत् सुमनोहरम् ।
बहुशो हा प्रियेत्येवं श्वसंस्त्वा मभिभाषते ॥ ४५ ॥

स देवि नित्यं परितप्यमानः
त्वामेव सीतेत्यभि भाषमाणः ।
धृत व्रतो राजसुतो महात्मा
तवैव लाभाय कृत प्रयत्नः ॥ ४६ ॥

सा राम संकीर्तन वीतशोका
रामस्य शोकेन समान शोका ।
शरन् मुखे साम्बुद शेष चन्द्रा
निशेव वैदेह सुता बभूव ॥ ४७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे षट्त्रिंशः सर्गः
॥ ३६ ॥